# भारतस्य भवितव्यम्†

स्वामी जपसिद्धानन्दः*

इयं सा सनातनभूमिः यां ज्ञानम् आदौ देशान्तरसङ्क्रमणात् प्राक् स्वनिवासम् अकृत।[१] इदं तद् भारतं यस्य वहन्नदीभिः सागरोपमाभिः अध्यात्मभाव-प्रवाहः अधिभौतम् आपादितः इव, यत्र चिरन्तनः हिमालयः स्तरम् अनुस्तरम् उत्क्रामन् हिममकुटैः दिवो रहस्यान्यपि ईक्षते इव। इदं तदेव भारतं यस्य मृत्तिका ऋषीणाम् अनुत्तमानां पादैः संक्रान्ता। अत्रादौ समजनि जिज्ञासा पुरुषस्वरूपे प्रत्यक्-प्रपञ्चे च। इह प्रथमं समुदिताः सिद्धान्ताः आत्मनः अमरत्वस्य, निरीक्षकभगवतः सत्तायाः, प्रकृतिपुरुषयोः अन्तर्यामिणः देवस्य च। इह पराकाष्ठां प्रापुः उच्चतमानि लक्ष्याणि धर्मस्य च दर्शनस्य च। सोऽयं देशः यस्मात् महोर्मयः इव रंहसा निर्गम्य अध्यात्मभावः दर्शनं च पौनःपुन्येन अवनीतलम् आप्लावयामासतुः। स एवायं देशः यतः पुनरपि तादृशाः तरङ्गाः निष्क्रामेयुः[२] मनुकुलस्य जीर्यज्जनेषु प्राणं तेजश्च आदधानाः। इदं तदेव भारतं यद् असहत बहूनां शतकानाम् आघातम्, शतशः आक्रमणं परेषाम्, तुमुलोद्रेकं च रीतिचर्याणाम्। इयं सैव भूमिः या जगत्यां यावच्छैलान्तरात् द्रढीयसी तिष्ठति अमरेण ऊर्जसा, अनाश्येन ओजसा च। तस्य जीवितम् आत्मतुल्यस्वभावम् अनादि, अनन्तम्, अमरम्। वयं च सुताः तदृश्याः भुवः।

हे भारतात्मजाः, अहमद्य क्रियान्वयि किञ्चिद् भवतः भाषितुम् इहोपस्थितः। अस्मदीयं पुरावैभवं भवतः स्मारयतो मम विद्यते अयं हेतुः - “अतीतस्य चिन्तनम् अवकर्षति, अकिञ्चित्करं च। अतः भाविनि दत्तदृष्टिना भाव्यम्” इति बहु वारम् उदितोऽस्मि। तत् सत्यम्। किन्तु भूताद् विसृज्यते भविष्यत्। अवलोकयत अतः अतीतं यावच्छक्ति सुदूरम्। आकण्ठं पिबत प्राग्भ्यः सनातनस्रोतोभ्यः। ततः परं पश्यत पुरस्ताद्, क्राम्यत[३] अग्रे, विधत्त भारतं भास्वरतरं महत्तरम् उदग्रतरं च अभूतपूर्वविधया। अस्मत्पूर्वजाः बभूवुः महात्मानः। प्रथमं तत् स्मरणीयम् अस्माभिः। शिक्षामहै सत्तामूलम् अस्माकं यद् रक्तं वहति अस्मन्नाडीषु। श्रद्दधीमहि तन्मूले तत्कृतप्रभावे च। ततः श्रद्धायाः, व्यतीतमहिमज्ञानाच्च विदधीमहि भाविभारतं पूर्वापेक्षया महत्तरम्। आसन् कालावधयः यत्र अपचयः अवनतिश्च बभूवतुः। नाहम् अधिकं प्राशस्त्यम् अनुबध्नामि तेषु, वयं सर्वे तान् जानीमः। अमी कालावधयः तत्तत्प्रयोजकाः अभूवन्।

विशालः वृक्षः सूते रुचिरं पक्वं फलम्। कालेन तत् फलं निपतति भूमौ, शीर्यते, पूयते च।

---

† नवयुगाचार्याणां श्रीमद्विवेकानन्द-स्वामिचरणानां “The Future of India” इति भाषणस्य संस्कृत-भावानुवादः। तच्च भाषणं पश्चिमदेशेभ्यः प्रत्यागतैः तैः चेन्नैनगरे विहितम् आसीत् १८९७ क्रिस्ताब्दे।

* संयोजकः तथा विभागाध्यक्षचरः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

१ “any” left out to keep the diction simple and readable

२ क्रमः परस्मैपदेषु (७.३.७६ / २३२२) इति क्रमो दीर्घः परस्मैपदे शिति।

३ “वा भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः” (अष्टा.३.१.७०) इति श्यन् वा स्यात् कर्त्रर्थे सार्वधातुके परे।

उत्सन्नात् तस्माद् उद्गच्छति मूलं भावि-पादपश्च। स्यादयं महीयान् मूलमहीरुहात्। योऽयम् अवसादनावधिः अस्माभिः अतिक्रान्तः स नितराम् अपेक्षितः आसीद्। अवसादाद् अस्माद् आविर्भवद् अस्ति भविष्यद् भारतम्, सम्भवदङ्कुरम्, यस्य प्रथमपत्राणि सम्प्रति निर्गतपूर्वाणि। सुविपुलः स महाविटपी ऊर्ध्वमूलः इह नयनपथम् आरोढुं प्रवृत्तः। तेन सम्बद्धम् एव अहं भवतः विवक्षुः अस्मि।

देशान्तरेषु ये सङ्कटाः तदपेक्षया भारते संबाधाः जटिलतराः गुरुतरप्रभावाश्च। वंशः, धर्मः, भाषा, शासनम् इत्येतत्सर्वं सम्मिलितं सत् निर्वर्तयति राष्ट्रम्। अभिजनम् अभिजनम् अनु परिशीलनेन प्रतीयते यत् लोकेऽस्मिन् राष्ट्रस्य घटकानि तत्त्वानि कतिपयान्येव भवन्ति, ऋते भारतवर्षाद् यस्य घटकाः भवन्ति बहवः। अत्र आर्याः, द्राविडाः, टार्टर्-जनाः, तुर्कदेशीयाः, मोघल-जनाः, युरोपाभिजनाः सर्वे स्वं स्वं जीवसारं अस्मिन् देशे जुहृत इव बभूवुः। भाषाणां च मनोज्ञतमः सङ्गमः विलसति अत्र। आचाराणां परम्पराणां च अत्रैव विपर्ययः अधिकतरः - न तावन् व्यत्ययः युरोप-पौरस्त्ययोः मध्ये, यावद् भारतीययोरेव अवान्तरजात्योः स्यात्।